२। पाश्चात्यजगति उपनिषदां प्रभावः संक्षेपतः आलोचनीयः।

उपनिषत् सनातन भारतीयार्यमनीषायाः स्वर्णफलम्। 'वसुधैव कुटुम्बकम्' इति भावनया उद्दीप्तम् उपनिषत्साहित्यम् आसुमुद्रहिमाचले भारतवर्षे यद्यपि सुपरिचितमासीत्, किन्तु पाश्चात्यजगति तत् तथैव अपरिचितम्। सुदीर्घकालं यावत् पाश्चात्यवासिनः उपनिषदां भावमाधुर्यात् दार्शनिकगौरवाच्च वञ्चिताः आसन्।

सप्तदशशतकस्य मध्यभागे विश्वज्ञानसाधनायाम् अभूतपूर्वमेकम् आलोडनं सञ्जातम्। भारतसम्राजः शाहजाहानमहाभागस्य विद्वान् सुपुत्रः राजकुमारः दाराशिकोमहाभागः पञ्चाशत्, मतान्तरे द्विपञ्चाशत् उपनिषदां पारसीकभाषायाम् अनुवादं कृतवान्। तेन च अनुवादकर्मणा मध्यप्राच्यानां देशसमूहे, ततः पाश्चात्यदेशसमूहे उपनिषद्भावधारायाः क्रमविकाशः जातः।

१६५७ खीष्टाव्दे संस्कृतपण्डितानां पार्सीपण्डितानां सहयोगेन दाराशिकोमहाभागस्य अनुवादकर्मणः प्रायतः शतवर्षात् परं आयानक्युइटाल डुपेरण नामकेन केनापि फरासीपण्डितेन उपनिषदां पारसीकानुवादः ल्याटिनभाषायाम् पुनरनूदितः। ऊणविंशशतकस्य प्रारम्भिके लग्ने (१८०१-१८१२) डुपेरणमहाभागस्य ल्याटिन संस्करणं प्रकाशितं जातम्। स च अनुवादः 'OUPNEK'HAT' इति नाम्ना अभिहितः अभवत्।

इतः पूर्वं अष्टादशशतकस्य उपान्तभागे स्यार उइलियम जोन्समहाभागः वङ्गप्रदेशस्य शासकस्य ओयारेण हेस्टिंसमहाभागस्य अनुप्रेरणायां कलिकातायां 'एशियाटिक सोसाइटि' नामिकां प्राच्यविद्यासंस्थां स्थापितवान्। भारतीयप्रज्ञायाः सम्यक् परिचयं प्राप्य, भारतीय भावधारया च उत्साहितः सन् जोन्समहाभागः महाकवेः कालिदासस्य अभिज्ञानशकुन्तलस्य आङ्गलानुवादं कृतवान्। अन्येषां च बहुनां संस्कृतसाहित्यानामपि आङ्गलानुवादः तेन सम्पादितः।

दाराशिकोमहाभागस्य उपनिषदां पारसीकानुवादः डुपेरणमहाभागस्य ल्याटिनानुवादः जोन्समहाभागस्य संस्कृतसाहित्यानामनुवादः—अनेन

त्रिवेणीसङ्गमेन भारतीयप्रज्ञायाः मूलीभूता उपनिषत् पाश्चात्यजगति सुपरिचिता जाता।

**ग्रीसदेशे भारतीयप्रज्ञायाः प्रसारः**— मानवसभ्यतेतिहासे ग्रीसदेशः अन्यतमः सुप्राचीनः देशः। चिरन्तनज्ञानसाधनायाः गर्भगृहद्वयोः ग्रीस-भारतयोर्मध्ये वाणिज्यिकसम्पर्केन सह बौद्धिकसम्पर्कं सुप्राचीनम्। ग्रीसदेशस्य दर्शनभावनया सह भारतीयदर्शनस्य निकटसादृश्यं गवषकैः परिलक्षितम्। पिथोगोरासमहोदयस्य उपपाद्यतत्त्वं वैदिकशुल्वसूत्राणाम् अनुरूपम्। प्राचीने एथेन्सनगरे केनचित् आर्य ऋषिणा सह सक्रेटिसमहाभागस्य साक्षात्कारः सुविदितः। प्लेटोमहाभागस्य 'Republic'ग्रन्थेन सह मनुसंहितायाः योगसूत्रं विवुधैः परिलक्षितम्, आत्माविषयिका ग्रीकभावना वेदान्तदर्शनेन सह सङ्गतिपूर्णा। 'Metaphysics' ग्रन्थे अयारिस्टटलमहाभागेन वर्णितः 'The unmoved mover' इति तत्त्वम् उपनिषद् वर्णितं आत्मतत्त्वेन सह सादृश्यपूर्णम्।

**फ्रान्सदेशे उपनिषदः प्रभावः**—सप्तदशशतकस्य अन्तिमे लग्ने इउरोपमहादेशस्य फ्रान्सदेशे भारतीयप्रज्ञायाः प्रसारः जातः। क्याथलिकधर्मयाजकानाम् अत्याचारात् मुक्तिलाभार्थं फ्रान्सदेशे नवजागरणस्य सूचनार्थं भल्तेयार, भिक्टरकाजिन प्रमुखाः चिन्ताविदः उपनिषदाम् अध्यात्मतत्त्वेन आलोकिताः जाताः। फ्रान्सदेशस्य प्रख्यातपण्डितेन अयानक्युइटिन डुपेरणमहाभागेन दाराशिकोमहाभागेन पारसिकभाषायाम् अनूदिताः उपनिषदः ल्याटिनभाषायाम् पुनरनूदिताः। सिलभ्याँ लेभि, रोम्याँ रोल्याँप्रमुखाः फ्रान्सदेशीयाः विद्वज्जनाः डुपेरनमहाभागस्य अनुवादकर्मणा भारतीय प्रज्ञया सह परिचिताः जाताः। प्रख्यातफ्रान्सपण्डितेन लुइस रेनोमहाभागेन वेदान्तदर्शनमाश्रित्य बहवः ग्रन्थाः विरचिताः।

**जार्मानदेशे उपनिषदः प्रभावः**—फ्रान्स-इंल्याण्डदेशद्वयं भारतवर्षस्य शासनक्षमताम् अधिकर्तुं भारतवर्षम् आगतवान्। किन्तु जार्मानदेशः अत्र व्यतिक्रमः। जार्मानपण्डिताः भारतीयप्रज्ञायाः आस्वादनलाभाय केवलं भारतवर्षम् आगतवन्तः, भारतवर्षस्य अध्यात्मज्ञानविषयकचर्चा कृतवन्तः। उइलहेल्म हामवोल्डट् श्लेगेल-आर्थार शोपेन हाओयार -फ्रेडरिक



म्याक्समूलार-पल डयसेन प्रमुखाः जार्मानपण्डिताः आजीवनं भारतीयप्रज्ञायाः अनुध्याने निरताः आसन्। म्याक्समूलारमहाभागः सायनभाष्यसमेतं सम्पूर्णस्य ऋग्वेदस्य आङ्गलानुवादं कृतवान्। आर्थार शोपेनहाओयार महाभागः वेदान्तस्य अध्यात्मदर्शनेन आप्लुतः सन् अवदत्— **'It has been the solace of my life, it will be the solace of my death'.**

**इंल्याण्डदेशे उपनिषदः प्रभावः**—१७८४ खीष्टाव्दे कलिकातायां एशियाटिक सोसाइटि इति संस्थायाः स्थापनात् परं स्यार उइलियाम जोन्समहोदयः महाकवेः कालिदासस्य अभिज्ञानशकुन्तलस्य आङ्गलानुवादं कृतवान्। तदनन्तरं १७८५ खीष्टाव्दे स्यार चार्लस उइलकिन्समहोदयेन श्रीमद्भगवद्गीता आङ्गलभाषायाम् अनूदिता। अनेन अनुवादकर्मद्वयेन इंल्याण्डदेशे भारतीय प्रज्ञाविषये विवुधेषु प्रभूतः उत्साहः जायते। होरेस हेम्यान उइलसन्महाशयः भारतीयपुराण साहित्यानां काव्यमाधुर्येन च आप्लुतः सन् आङ्गलभाषायां तानि अनूदितवान्। स्यार मणियर उइलियाममहोदयः भारतीयप्रज्ञायाः विश्लेषणावसरे 'Modern India and Indians','Religious Thought and life in Ancient India' इति ग्रन्थद्वयं रचितवान्। तदन्तरं ओयार्डसओयार्थ-कोलेरिज-शेलि प्रमुखाः इंल्याण्डीयाः कवयः उपनिषदां भावरसामृतेन आप्लुताः सन्तः बहुनि काव्यानि रचितवन्तः।

**आमेरिकादेशे वेदान्तस्य प्रभावः**—भारतीयप्रज्ञां प्रति पाश्चात्यप्रीतिः आमेरिकादेशेऽपि प्रभूतं परिलक्ष्यते। तत्र वोस्टननगरे 'वेदान्त-सोसाइटि' नामिका संस्था आमेरिकावासिभिः गठिता। एमार्सनमहोदयस्य 'Brahma' कवितायां वेदान्तभावना परिस्फुटिता जाता। तत्रस्थिताः कवयः यथा एलियट-इयेटस्-डेविडथेरो हुइटम्यान्प्रमुखाः उपनिषद्भावनया भाविताः सन्तः काव्यचर्चा कृतवन्तः।

एवञ्च राशियादेशेऽपि वेदान्तस्य प्रभावः सूचितोऽभवत्। राशियादेशस्य विख्यातः कवि-साहित्यिकस्य लिओ टलस्टयमहाभागस्य **'The kingdom of God is within you'** इति ग्रन्थः वेदान्तभावनायाः एव फलश्रुतिः।

**३. पाश्चात्ये श्रीमद्भगवद्गीतायाः प्रभावः आलोचनीयः।**

श्रीमद्भगवद्गीता सनातनभारतवर्षस्य हृदयमन्थनजाता सुधा। कुरुक्षेत्रस्य रणाङ्गने कर्मवीरम् अर्जुनं स्वकर्मणि पुनःप्रवर्तनाय अवतार

पुरुषेण श्रीकृष्णेण ये खलु उपदेशाः प्रदत्ताः तेषां सङ्कलनम् अमृतमयी भागवतीकथा श्रीमद्भगवद्गीता। सप्तशती गीता अष्टादशाध्यायेषु विभक्ता। अन्येभ्यः शास्त्रग्रन्थेभ्यः गीता अनन्या। अन्याः सर्वे शास्त्रग्रन्थाः ऋषिभिः प्रोक्ताः, किन्तु गीताशास्त्रं श्रीभगवता स्वयं प्रोक्तम्— 'या स्वयं पद्मनाभस्य मुखपद्माद्विनिसृता'।

अर्जुनं पुरस्कृत्य श्रीभगवता गीतामृतः विश्वजनेभ्य उपदिष्टः। वर्ण-धर्म-जाति-सम्प्रदायनिरपेक्षः गीताग्रन्थः विश्वकल्याणाय नियोजितः। अथ सप्तदशशतकस्य मध्यवर्त्तीसमये सम्राटपुत्रेण दाराशिकोमहाभागेन पारसीकभाषायां गीतायाः अनुवादमात्रं गीतारश्मिः दिग्विदिक्षु सम्प्रचारिता जाता। इंरेजराजकर्मचारिणा स्यार चार्लस् उइलकिन्स महाभागेन आङ्गलभाषायाम् अनूदिता भगवद्गीता समग्रे पाश्चात्ये जगति सम्प्रचारिता। तदनन्तरं ल्याटिन-जार्मान-फ्रान्स-इंरेजी भाषासु गीतायाः अनुवादः निरन्तरं प्रकाशितः जातः। परिसंख्यानानुसारं एयावत्कालपर्यन्तं विश्वस्य द्विशताधिकासु भाषासु गीतायाः सहस्रद्वयं संस्करणं प्रकाशितमभवत्।

पाश्चात्यदेशेषु जार्मानदेशे गीतानुध्यानं सर्वाधिकं परिलक्ष्यते। जार्मानपण्डितः जेकव उइलहेल्म हाओयार महोदयः गीतां तस्य चिरन्तनी मातृरूपेण वन्दितवान्— '**Geeta is my Mother. I lost my earthly mother who gave me birth long ago, but this Eternal mother has completely filled her place by my side ever since**' बहवः जार्मानचिन्तानायकाः यथा कान्ट-श्लेगेल-शिलार-हार्डार-हेगेल प्रमुखाः गीतायाः अध्यात्मदर्शनेन उद्बुद्धाः आसन्।

अयानक्युइटाल डुपेरण महोदयस्य गीतानुवादं पठित्वा फरासी पण्डिताः भारतीयप्रज्ञायाः अनुध्याने व्यापृताः अभवन्। चार्लस् उइलकिन्स महोदयस्य गीताग्रन्थेन, म्यास्कमूलारमहोदयस्य **The Sacred Books of the East** ग्रन्थेन च फ्रान्सदेशीयाः विद्वज्जनाः गीतायाः दर्शनं प्रति आकृष्टाः अभवन्। ते च चिन्तानायकाः विश्वमानवतायाः आध्यात्मिकोन्नयने गीतोपदेशस्य प्रयोजनीयतां उपलब्धवन्तः।



आमेरिकादेशोऽपि भगवद्गीतायाः विश्वात्मबोधे उत्साहितः जातः। आमेरिकादेशस्य विख्यातः कवि-साहित्यिकः राल्फ्ओयाल्डो एमार्सनमहोदयः गीताज्ञानेन आलोकितः आसीत्। स्वामीविवेकानन्दः एमार्सनमहोदयस्य गीताज्ञानम् उच्चैः प्रशंसितवान्। एमार्सनमहोदयस्य '**ब्रह्म**' कविता गीतादर्शनेन आलोकिता।

आमोस् ब्रोनसन आलकोटमहोदयेन आमेरिकायाः वोस्टननगरे गीतापाठकानाम् संगठनमेकं रचितम्। फ्राङ्कलिन स्यावोर्णमहोदयस्य '**Leaves of Grass**' गीतोपदेशेन समृद्धं काव्यम्। आलदोस हाक्सलिमहोदयस्य '**The Near and The Far and Island**' उपन्यासेऽपि गीताज्ञानं प्रतिफलितम्।

इंल्याण्डदेशेऽपि भगवद्गीतायाः सुमहान् प्रभावः दृश्यते। स्यार उइलियाम जोन्समहाभागेन 'एशियाटिक सोसाइटि' इति संस्थायाः स्थापनात् परं इंल्याण्डवासिनः पण्डिताः भारतीयप्रज्ञां प्रति उत्साहिनः अभवन्। उइलकिन्समहोदयस्य अनूदितं गीताग्रन्थं पठित्वा, गीतामाधुर्यं च अनुभूय आङ्गलविद्वज्जनाः गीतानुध्याने निरताः जाताः। तत्र स्यार एडुइन आर्नल्डमहाभागः अमित्राक्षरछन्दसा भगवद्गीतायाः आङ्गलानुवादं प्रकाशितवान्। तत्र विशिष्टाः इंरेजकवयः कोलेरिज-ओयार्डस्ओयार्थ-शेली-स्कट्महाभागाः गीतायाः विश्वात्मावोधं तेषां काव्येषु परिस्फुटितवन्तः। टेनिसनमहाभागस्य '**The Ancient Sage**' कविता गीताज्ञानेस्योपरि आधारिता।

'**लिटलवय**' नामकस्य भयङ्करविस्फोरकस्य आविष्कर्ता जुलियास रवार्ट ओपेनहाइमार नामकः कश्चित् विज्ञानी। अनेन विस्फोरकेन जापानदेशे १९४५ खीष्टाव्दे भयङ्करी ध्वंसलीला संगठिता आसीत्। भयङ्करीं ध्वंसलीलामिमां संपश्य विज्ञानी ओपेनहाइमारमहोदयः भगवद्गीतायाः श्लोकमुच्चार्य आत्मनः प्रतिक्रियाम् अभिव्यक्तवान्। स च श्लोकः—

दिवि सूर्यसहस्रस्य भवेद् युगपदुत्थिता।<br>
यदि भाः सा स्याद्भासस्तस्य महात्मनः।। (गीता।११/१२)

**४. सुफीमतवादः कः भवति? सुफीमतवादः भारतवर्षे कदा आगतः? सुफीदर्शनस्य मूलवक्तव्यं परिस्फुटनीयम्।**

मध्यप्राच्यदेशात् उद्भूतः इसलामधर्मीयः 'सहजिया पन्थी' मतवादविशेषः सुफी मतवादः। आत्मज्ञानमार्गीयः सुफीमतवादः।

खीष्टिये द्वादशशतके भारतवर्षे सुफीमतवादस्य आगमनम् अभवत्। मुइनलदीन महम्मद चिस्तीनामकेन केनापि इसलामधर्मीयसाधकेन सुफीमतवादः भारतवर्षे आनीतः। उत्तरभारते प्रथमतया सुफीमतवादस्य विकाशः अभवत्।

वेदान्त-बौद्ध-योगदर्शन-पाश्चातस्य निओप्लोटोनिकदर्शनेन प्रभावितः अपि सुफीमतवादः इसलामधर्मस्य अवदानरूपेण स्वीकृतः। मुक्तमना-उदार-पन्थी-विश्वमानवतायाम् उद्बुद्धैः इसलामधर्मीयपण्डितैः सुफीमतवादः प्रवर्तितः।

'सुफी' शब्दः आरवीय 'सुफ' शब्दात् उत्पन्नः इति केचित्

मन्यन्ते। आरवीय 'सुफ्' शब्दस्यार्थः 'पशम' इति। सुफीसाधकाः पशमनिर्मितं शिरस्त्राणं धारयन्ति। अपरे तु ग्रीक 'Sofia' शब्दात् सुफीशब्दस्य उत्पत्तिं कल्पयन्ति। ग्रीकशब्दस्य 'Sofia' शब्दस्य अर्थः 'ज्ञानी'। अथ इसलामधर्मीयः मुक्तचिन्तः ज्ञानी एव 'सुफी'। सुफीसाधकः 'फकिर', 'दरवेश' इत्याख्यया अपि भूषितः भवति।

ईश्वरप्रेम सुफीसाधनायां मुख्यविषयरूपेण कल्पितं भवति। सुफीसाधकानां स्वतन्त्रः परिच्छदः वर्तते। शतखण्डैः छिन्नवस्त्रैः अयं परिच्छदः विरच्यते। अयञ्च परिच्छदः 'आल्खाल्ला' 'घिरका' वा कथ्यते। सुफीसाधकानां परिच्छदः वङ्गीयवाउलसम्प्रदायस्य 'चीरवास' नामकेन परिच्छदेन सह सादृश्ययुक्तः।

इसलामधर्मानुसारं सुफीवादः एकेश्वरतत्त्वे विश्वासी। सुफीदर्शने ईश्वरः युगपत् सगुणः निर्गुणश्च। निर्गुणरूपेण ईश्वरः शुद्धसत्त्वः निर्विशेषः भेदाभेदरहितः। सगुणरूपेण स प्राण-ज्ञान-सङ्कल्प-वल-वाक्य-श्रवण-दर्शनयोगेन जगति अभिव्यक्तः।

इसलामानुसारं ईश्वरः 'आल्लाह्' नाम्ना अभिहितः। सुफीमतानुसारम् ईश्वरवाचकाभिधा द्विधा भवति— प्रथमतः स्वरूप वाचकः तथा 'आल् आहाद' तथा एकः अद्वितीयश्च। द्वितीयतः गुणवाचकः तथा 'आल रहमान' तथा करुणामयः।

सुफीमतानुसारं जीवेश्वरयोः सम्बन्धः मोक्षमार्गे एव सम्पद्यते। मोक्षमार्गे स्वतन्त्रः विषयद्वयः कल्प्यते—सदर्थकः नञर्थकश्च। सदर्थकविषयः 'स्थितिः' अर्थात् प्रकृतस्वरूपस्य विकाशः। नञर्थकविषयश्च 'ध्वंसः'। ध्वंसः तथा अहंबोधस्य विनाशः। मानवानां स्वतन्त्रास्तित्वस्य तथा मनुष्यसुलभगुणानां विनाशः एव ध्वंसः।

सुफीदर्शनानुसारं मोक्षलाभः हि मनुष्याणां परमा गतिः। ईश्वरेण सह मिलनाभिलाषी मोक्षमार्गी सुफीसाधकः 'पर्यटकः' नाम्ना अभिहितः भवति। तथा च मोक्षप्राप्तिविषयिका प्रचेष्टा 'पर्यटन' इति नाम्ना चिह्नितः भवति। पर्यटकः सुफीसाधकः विशिष्टेन गुरुणा दीक्षितः भवति। सुफीसाधनायां गुरुः 'शेख', 'पीर' वा नाम्ना अभिहितः भवति। सुफीसाधनतन्त्रानुसारं सुफीसाधकेन अनुताप-संयम-वैराग्य-

दारिद्य-धैर्य-ईश्वरविश्वास-सन्तोषश्चेति सोपानसप्तकः अतिक्रम्यते।

उच्चकोटिकदर्शनभावनया विश्वात्मबाधेन च परिचालितः सुफीदर्शनः सार्वजनीनप्रेमभावनया उद्दीप्तः। भारतवर्षे सुफीसाधनायाः अन्यतमं पीठस्थानं राजस्थानप्रदेशस्य आजमीडशरीफ इति धर्मस्थानम्। तत्र इसलाम धर्मीयपुण्यार्थीभिः सह हिन्दु-बौद्ध-ख्रीष्टानपुण्यार्थीनामपि समावेशः भवति।

भारतवर्षे सुफीसाधनायां पातञ्जलयोगमार्गस्यापि अन्तर्भुक्तिः जाता। यथाह ड. ताराचाँदमहोदयेन तस्य **'Growth of Islamic thought in India'** ग्रन्थे — **'In India the Sufi orders, approximated to the Hindu practices of Yoga'**.

सुफीदर्शनानुसारं साधकः सप्ततिसहस्रम् आवरणं साधनवलेन छित्वा ईश्वरसायुज्यं लभते। सुफीसाधनायाः इयं भावना वेदान्तदर्शर्ननुरूपा। मुण्डकोपनिषदि परमात्मसायुज्यलाभाय जीवदेहस्थितम् आवरणभेदः उपदिष्टः—

**भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः।**

**क्षीयन्ते चास्यकर्माणि तस्मिन् दृष्टे परावरे।।** (मुण्डक २.२.९)

सुफीसाधना एकेश्वरवादस्य साधना। पारस्परिकं प्रेम-सौहार्दमेव तत्र काङ्क्षितम्।